# ५५. आम्रशलाटुकर्त्तनम्

शक्नोति-शक्नुवन्ति

स्वामी - शिव ! सोम ! राम ! अत्र आगच्छन्तु। एते आम्रशलाटवः आवश्यकाः। कः कर्त्तयितुं शक्नोति ?

रामः - अहं तु न शक्नोमि। सोमः, शिवः वा शक्नुयात्।

सोमः - अहम् अपि न शक्नोमि। शिवः अपि न शक्नुयात् ?

स्वामी - तर्हि तान् वृक्षात् उत्पाटयितुं कः शक्नोति।

सोमः - मम गृहपार्श्वे गङ्गारामः इति एकः अस्ति। सः एतादृशकार्ये अतीव चतुरः अस्ति। सः उत्पाटयितुं शक्नुयात्।

स्वामी - अहं तु न शक्नोमि, भवन्तः अपि न शक्नुवन्ति। तर्हि तं गङ्गारामं सूचयतु। कः सूचयति ?

शिवः - अहं तं सूचयितुं शक्नोमि।

रामः - तत्तु निश्चयेन शक्नोति एव।

स्वामी - श्वः तत् कार्यं समापयन्तु। सः तु वृक्षात् उत्पाटयति। तान् गृहम् आनेतुं शक्नुवन्ति खलु ?

सोमः - तत्तु निश्चयेन शक्नुमः।

स्वामी - सोम। शृण्वन्तु, अहं एकसप्ताहं नगरे न भवामि। अतः किं किं कार्यं समापयितुं शक्नुवन्ति इति चिन्तयन्तु।